अपसर्पन्तु ते भूताः ये भूताः भुवि संस्थिताः । ये भूता विघ्नकर्तारो नश्यन्तु
अपरिवं मोटकथ कुशतिलान् प्रतिदिशं प्रक्षिपेत् ६ नाश्यन्तु शिवाज्ञया ॥ ६

श्रीगणेशाय नमः अथ पार्वणश्राद्धं लिख्यते अपराह्णे स्ना
तः शुक्लादिवासः शुचिराचम्य श्राद्धदेशमागच्छेत् तत्र प्राङ्मु
खमुपविश्य सिद्धान्नसंभवे सिद्धमिति पात्रिकां स्थाप्य कर्म
पात्रे जलं गंधं गंगाजलं तुलसीदलं पुष्पं आछारं मे गयां ध्यात्वा
ध्यात्वा देवं गदाधरम् स्वपितॄन् मनसा ध्यात्वा ततः श्राद्धं समा
रभेत ॥ १ ॥ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः ॥ प्रतीचीमाज्यपा
स्तद्वदुदीचीमपि सोमपाः ॥ ऊर्ध्वं चैवार्यमा रक्षेत् कव्यवाडन
लोऽप्यधः ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चा
धिपस्तेषां यमो रक्षां करोतु मे ॥ तिलान् रक्षन्त्वसुरान् दर्भा रक्षन्तु
राक्षसान् पंक्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः ॥ इति

१

१

दुबके:३

सजवमुत्सृजेत् ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानां अमुकामुकशर्म्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवा इदमासनं वो नमः इति कुशत्रयं जवजलैः ॥ उत्सृजेत् ॐ अद्यामुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्म्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवा इदमासनं वो नमः इत्यपसव्युत्सृजेत् ततोऽपसव्यं कृत्वा पातितवामजानुर्दक्षिणाभिमुखः द्विगुणभुग्नकुशत्रयतिलजलैर्न्यावप पूर्वपश्चिमक्रमासादितमोटकरूपाणि बडासनानि तिलजलप्रोक्षितानि प्रत्येकं पित्रादिभ्यः पश्चिमत आरभ्य उत्सृजेत् तत्र क्रमः ॐ अद्यामुकगोत्र पितरमुकशर्म्मणा पार्वणश्राद्धे इदमासनं ते स्वधा एवमेव मातामहप्रमातामहवृद्धप्रमातामहेभ्यो दद्यात् ततः

दिग्बंधनं कृत्वा ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः
स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः इति पठित्वा ॐ पुण्ड
रीकाक्षः पुनातु इति कुशाग्रपानीतजलैः आत्मवस्तूनि सिंचये
त् ततः कुशाग्रयवतिलजलैः संकल्पं कुर्यात् ॐ अद्यामुकमासीया
मुकपक्षीयामुकतिथौ अमुकगोत्राणां पितृपितामहप्रपिताम
हानां अमुकामुकशर्मणां अमुकगोत्राणां मातामहप्रमाता
महवृद्धप्रमातामहानां अमुकामुकशर्मणां पार्वणश्राद्ध
विश्वेदेवपूर्वकमहं करिष्ये ततो गायत्रीं त्रिर्जपित्वा ॐ देव
ताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्व
धायै नित्यमेव नमो नमः इति त्रिर्जपेत् ततउत्तराभिमुखो

[illegible] न
दक्षिणोत्तरक्रमासादितकुशान्[illegible]

त्रेषु तिलान्विकीर्य ॥ ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभि
र्देवयानैः । अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु ० तेऽवन्त्वस्मान् इति ज
पेत् ततः सव्यं कृत्वा देवार्घपात्रद्वये पवित्रे धृत्वा अपसव्येन पित्रार्घ
र्घपात्रषट्केऽपि प्रत्येकं पवित्रं धृत्वा सव्येन देवार्घपात्रद्वये ॐ शन्नोदे
वीरभीष्टय आपो भवन्तु पीतये शंयोरभिः स्रवन्तु नः इति जलं प्रक्षि
प्य अपसव्येन पित्रार्घपात्रषट्केऽपि । अनेनैव मन्त्रेण जलं पितृ
तीर्थेन क्षिपेत् ततः सव्यं कृत्वा ॐ यवोऽसि यवयास्मद्द्वेषो यवयारा
तीः इति देवार्घपात्रद्वये प्रत्येकं यवान् प्रक्षिप्य अपसव्येन पित्रार्घ
पात्रे प्रत्येकम् ॐ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नम
द्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वधेति तिलान् क्षिपेत्
ततः सव्येन देवार्घपात्रद्वये तूष्णीमेव गंधपुष्पे प्रक्षिपेत् ततः सव्यं

सव्यं कृत्वा प्रयांतु दूरतः सर्वे पापानि च कुशास्तिलाः सर्वभूतेभिरक्षान्त्यर्थे
जीवीवं धनं करोम्यहम् ॐ विश्वेदेवानहमावाहयिष्ये इत्युक्त्वा ॐ विश्वेदेवा
स आगत शृणुतामयिम हवं इदं बर्हिर्निषीदत इत्यनेन देवानावा
ह्य जवोसि जवश्रास्महे बो जवपारातीरिति जवान्विकीर्य ॐ विश्वेदे
वाः शृणुतेम हवं मे ये अन्तरिक्षे य उप द्यविष्ठ ये अग्निजिह्वा उत
वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् इति जपेत् ॐ आगच्छन्तु म
हाभागा विश्वेदेवा महाबलाः ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते
इति पठेत् ततोऽपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः ॐ
तिलान्गृहीत्वा पितॄनहमावाहयिष्ये इत्युक्त्वा आवाहयेत् ॐ उशन्त
स्त्वा नि धीमह्युशन्तः समिधीमहि उशन्नुशत आवाह पितॄन्हविषे
अत्तवे इति पितॄनावाह्य ॐ अपहता असुरा रक्षांसि वेदिषदः इति पा

नं ५
४

दद्यात् ॐ अद्यामुकगोत्र पितरमुकशर्म्मन् पार्वणश्राद्धे एषते
हस्तार्घः स्वधेति तदुत्सृजेत् एवमेव पितामहादिभ्यो दद्यात्
ततः सव्यं कृत्वा पवित्रसहितमर्घपात्रं उत्तानं देवार्घपात्रस्य
रूपं पश्चात्क्रमः प्रत्येकं देवासनं दक्षिणपार्श्वे ॐ विश्वेभ्यो देवे
भ्यः स्थानमसि इत्युत्तानमेव धारयेत् अपसव्यं कृत्वा प्रपि
तामहार्घपात्रस्थपवित्रादीनि पितामहार्घपात्रोपरि दत्त्वा पि
तृवामपार्श्वे पितृभ्यः स्थानमसीति मिलिता न्येव न्युब्जं
कुर्यात् एवमेव मातामहार्घपात्राणि मेलयित्वा मातामह
वामपार्श्वे ॐ मातामहप्रमातामहवृद्धप्रमातामहेभ्यः स्था
नमसीति तदर्घपात्राणि न्युब्जं कुर्यात् तथा स्थापितानि
त्रानि दक्षिणादानपर्यन्तं नोद्धरेत् न चालयेत् सर्व

४

कृत्वा एकं दैवार्घपात्रं वामहस्ते कृत्वा तत्र स्थितपवित्रे देवभोजनपा
त्रे पूर्वाग्रं धृत्वा तदुपरि किंचिदुदकानयं दत्वा ॐ यादिव्या आपः
पयसा संबभूवुर्या अन्तरिक्षा उत पार्थिवीर्या हिरण्यवर्णा यज्ञि
यास्ता न आपः शिवाः शंस्योनाः सुहवा भवन्तु इति पठित्वा पवकुशा
ञ्जलौ न्यावाय ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानां
अमुकामुकामुकशर्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवा एष
हस्तार्घो वो नमः ॐ मातामहादित्रयश्राद्धसंबंधिनो विश्वेदेवा
पार्वणश्राद्धे एष हस्तार्घो वो नमः अर्घेषु नः प्रत्यवनम् इत्यर्घ
मुत्सृजेत् ततोऽन्यपात्रमधः कृत्वा एकं पित्र्यर्घपात्रं वामहस्ते कृ
त्वा पितृभोजनपात्रे उत्तराग्रं पवित्रे धृत्वा तदुपरि उदकानी
यं दत्वा ॐ यादिव्या आपः इत्यादि पठित्वा मोटकं तिलजलान्या

सव्येनाततः जलेनासन्नभोजनपात्रेसहितं त्रेष्ठशिलामरुल्ला
लिकुर्यात् अपसव्येन पितृभोजनपात्रं वेष्टयेत् अनेन मंत्रेण
यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षतु एवं मत्खड्गरश्म्यैतत्सर्वं
भूतानि रक्षतु इति मंत्रेणांगुष्ठेन ततः आद्यपात्रगर्भमा

५ मानीयसहतं सव्येनैव प्राङ्मुखपुटकादिस्थित जले आहुतिद्व
यं जुहुयात् ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय पितृ

5 मते स्वाहा ततो जलतिलसहितघृतसंयुतं अन्नमयम् ५
सव्येन ॐ इदमन्नमेतद्भूस्वामि पितृभ्यो नमः इति दद्यात्
ततो हुतशेषं अन्नं किंचित्किंचित् सव्येन देवपात्रद्वये अपस
व्येन पित्रादिपात्रेषु दत्वा पिण्डार्थं च किंचिद्धारयेत् सव्येना
ऽन्नोकरणां पूर्वं भिक्षुश्चाभूतान्स्तीत्येन [illegible] तूष्णीं ततोऽपसव्येन

कृत्वा यवकुशजलैः ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहा
नाममुकामुकशर्म्मणां पार्वणश्राद्धसंबन्धिनो विश्वेदेवा ए
तानि गंधपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसि वो नमः इति
यथासंभवमुत्सृजेत् एवमेव मातामहादिभ्योऽपि दद्यात् पात्रा
णि पितृभ्यः स्थानमसीति न्युब्जीकरणम् तदुपरि कुशत्रयं द
द्यात् गंधपुष्पधूपदीपताम्बूलवासांसि निधाय अद्येह अस्म
त्पित्रादित्रयश्राद्धसंबन्धिनो विश्वेदेवाः एतानि गंधादीनि वो
नमः एवं मातामहादित्रयसंबन्धिनोऽपि ततोऽपसव्यं मोट
कतिलजलैः ॐ अद्यामुकगोत्र पितरमुकशर्म्मन् पार्वणश्रा
द्ध एतानि गंधपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसि ते स्वधा
इति पित्रे गंधादि दद्यात् एवमेव पितामहादिभ्योऽपि दद्यात्

दक्षिणाभिमुखः भूस्वामिने दद्यात् सव्वृतं अञ्जनमन्त्रं अप
सव्येन ॐ इदमन्नमेतत् भूस्वामिपितृभ्यो नमः ततो लेष्ठमन्त्रे सि
हमायमंयंनोघृतआहारसमंमत्स्यकं परिविष्य पात्रं संभवमुपक्षराम्
जलं छत्रं च तत्रोपनीय सव्येनैव पात्रे अपसव्येन पित्रादिपात्रेषु
अन्नोपरि मधु दद्यात् ततः प्रत्येकं ॐ मधु वाता ऋतायते मधु क्ष
रन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधु नक्तमुतोषसो मधुमत्पा
र्थिवं ॐ रजः मधु द्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमां अ
स्तु सूर्यः माध्वीर्गावो भवन्तु नः ॐ मधु मधु मध्विति जपेत् पृथक् जलं
दत्वा पात्रावलंबनं विधाय ततः सव्येन उत्तानपाणिभ्यां देवपात्रेषु
स्पृष्ट्वा ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृ
तं जुहोमि स्वाहा ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढम

त्रियान्नामपि मद्धू सोमनसेस्याम इति पठित्वा ॐ सहस्रशीर्षापु
रुषः इत्यादि पठित्वा ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षो
भणश्चर्षणीनां संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्
ॐ प्राकेभिन्द्रः इत्यादि कर्म प्रतिरूप अन्यानि च पवित्राणि ज
पेत् ॐ सप्तव्याधा दशार्णेषु मृगाः कालिंजरे गिरौ चक्रवाकाः श
रद्वीपे हंसाः सरसि मानसे तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेद
पारगाः प्रस्थिता दूरमध्वानं यूयं किमवसीदथ इति नमस्तुभ्यं
विरूपाक्ष नमस्ते नेकचक्षुषे नमः पिनाकहस्ताय वज्रहस्ताय
वै नमः इति पठित्वा ततउल्लिख्य संनिधौ आस्तृतकुशत्रयं भू
मिं प्रोक्ष्य विकरासनम् ततः सव्येन हस्तेन पादौ प्रक्षाल्याचमे
हरिं स्मृत्वा अपसव्येन दक्षिणाभिमुखः वेदीं कुर्यात् ॐ अ

रूपाणि प्रतिमुंचमाना असुराः संतः स्वधया चरन्ति परापुरो
निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मात् इति मंत्रेण
ज्वलदंगारं प्रत्येकं भ्रामयेत् अंगारं दक्षिणतो निदध्यात्
ततः कुशमूलेन सकृत दक्षिणाग्रं कुशत्रयम् रेखायाम्
आस्तृणुयात् एवमेव पररेखायामास्तृणुयात् ततः
सव्यं कृत्वा ॐ देवताभ्य इत्यादि त्रिर्जपेत् ततोऽपसव्यं
कृत्वा पृथक् दर्भषट् तत्र जलतिलगंधपुष्पाणि कृत्वा
एकं पात्रं वामहस्ते कृत्वा मोटकेन तिलजलेनाप्यादाय ॐ अ
त्रामुकगोत्र पितरमुकशर्मन् पात्रे राश्राद्धपिशाऽस्वा

८

संस्कृतस्य प्रणीतानां त्यागिनां कुलदीपितानाम् । उत्तिष्ठ भाग
धेयानां दर्भेषु विकिरासनम् । इति मंत्रेण सर्वप्रकारमन्नं सति
लेज्जलमध्ये त्यजेत् । ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः
कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् । इति मंत्रेण
मंत्रस्य पूर्वसमुद्दिष्टं विकिरेत् । ततः कुशत्यागः हस्तौ पादौ प्रक्षा
ल्य स्वयं कृत्वा आचम्य हरिं स्मृत्वा गायत्रीं त्रिः जपेत् । मधुवा
ता इत्यादि मधु मधु मधु इत्यादि जपेत् । ततोऽपसव्यं पिण्डपा
त्रं तापनिर्मितं हस्तमात्रं चतुरस्रं चतुरंगुलोच्छ्रितं पिण्डस्थापि
डके पूर्वमेव स्थापितस्य हस्तस्य तत्परिभागे तद्दक्षिणहस्तेन ध
त मूलेन परिलिखेत् । ॐ अपहता असुरा रक्षांसि वेदिषद इति मंत्रेण
पादेशमात्रं रेखा [illegible] ये

ॐ३

गमुजास्तर्पयंतु इतिपठित्वा पित्रादिपिराडपा कुशमूलेकरेप्रोक्ष्य
तिराचामेत् संमंतनोहरिंस्मृत्वा अपसव्यंकृत्वा दक्षिणाभि
मुखः अत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिपठि
त्वा वामावर्त्तेनोदङ्मुखोभूत्वाप्रीतमनाः स्वासंनिपम्यते
नैवपथावर्त्तमानः पितृमास्वरमूर्तिध्यायन् ॐ अमी
मदन्तपितरोयथाभागमावृषापिषतेतिपिराडोपरिक्षिपेत्
जपेत् ततःपूर्वदत्तावशिष्टजलंपुनःअवनेजनपात्रमादा
य ॐ अद्यामुकगोत्रपितरमुकशर्मन् पात्रेगाङ्गाद्यपि
त्रावनेनिक्ष्वतेस्वधा एवंपितामहादिपंचभ्योपिपिराडप्रत्यं
वनेजनंदद्यात् ततोनीवींविस्रंस्यावमृष्य....ततोऽपसव्यं
कृत्वा सूत्रदानम् वामेनपाणिनोद्धृतंदक्षिणाकरेसूत्रंकृत्वा

मध्यमुभलिरूलामन्त्रीडत्सृजेत् एवमेव पितामहादिपंचानां
षष्ठ्यन्तनाम्नां प्रत्येकमुत्सृजेत् ततः सव्यं कृत्वा दक्षिणादिशं प
श्यन् सुमनाः पिण्डोपरि ॐ अत्र वीराः पितरः सन्तु इति पठन् पूर्व
न्यस्तपवित्रकुशोपरि जलधारां दद्यात् ततोऽपसव्यं कृत्वा आशिः
प्राङ्मुखः आशिषः प्रार्थयेत् ॐ गोत्रं नो वर्द्धतां दातारो नोऽभि
१० वर्द्धन्तां वेदाः संततिरेव च श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्तु
10 अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च १०
याचिष्म कंचन एताः सत्याशिषः संतु ततोऽपसव्यं कृत्वा पिण्डो
परि सपवित्रकुशानास्तीर्य ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कौ
लालं कामकामयत इति पठित्वा परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्
इति पवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात् ततः नाम्नी

ॐ नमो वः पितरो रसाय नमो वः पितरश्शोषाय नमो वः पितरो जी
वाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो
मन्यवे नमो वः पितरो पितरो नमो वो गृहान्नः पितरो दत्त सतो वः
पितरो द्वेष्म एतद्वः पितरो वासः इति पठित्वा षट्पिण्डे सूत्राणि ता
मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन्
पार्वणश्राद्धे पिण्डे एतत्ते सूत्रालंकं वासः स्वधा इति उत्सृजेत्
एवमेवापरेषं चेषु पिण्डेषु सूत्रं समुत्सृजेत् ततो गन्धपुष्प धूपदीप
ताम्बूलानि प्रत्येकं पिण्डेषु दद्यात् ॐ शिवा आपः सन्तु इति जलम्
ॐ सौमनस्यमस्तु इति पुष्पम् ॐ अक्षतं चारिष्टं चास्तु इति त
ण्डुलान् अन्नपात्रेषु क्षितिः क्षिपेत् ततो मोटकादीन्यादाय ॐ
अद्यामुकगोत्रस्य पितरमुकशर्मणः पार्वणश्राद्धे दत्ते दत्तपानादिके

पंचभ्योपि दक्षिणां दद्यात् हिरण्यरजतं संपत्त्योपधासं नवमन्यदपि फ
लादि दक्षिणां दद्यात् एतदसंप्रादाये इदं भिक्षिप्रयोगेन कार्य्यः तावदेव
द्रुमूलं कर जलं भित्तिपदं कुर्य्यात् सव्येन देवार्घपात्रं इषे त्वा लयेत्
अपसव्येन पित्रार्घपात्रं उत्तानीकृत्य ॐ वाजे वाजे वत वाजिनो
नो धनेषु विप्रा अमृता ऋतज्ञा अस्य मध्वः पिबत मादयध्वं तृ
प्ता यात पथिभिर्देवयानैः ॐ आ मा वाजस्य प्रसवो जगम्यादेवे द्या
वापृथिवी विश्वरूपे आ मा गन्तां पितरा मातरा चा मा सोमोऽमृतत्वा
य गम्यात् इति पित्रादीन् विसर्जयेत् सव्येन विश्वेदेवाः प्री
यन्तामिति देवविसर्जनम् ॐ देवताभ्यः इति त्रिर्जपेत् ततोऽ
पसव्येन रक्षादीपं निर्वाप्य हस्तौ पादौ प्रक्षाल्याचम्य हरिं स्मरणं
कृत्वा ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव त

रूपपिण्डान्नपात्रे पोत्थाप पेत् गयायां पितृरूपेण स्वयमेव
जनार्दनः तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ततः सव्ये
न कुशत्रय याजयज्ञैर्दिवेदेव दक्षिणां दद्यात् पिण्डाधार कुशान्
मुकां वेहो क्षिपेत् ॐ अद्यामुक गोत्राणां पितृपितामहानां मम
कानुकशर्मणां पार्वणश्राद्धे संवत्[illegible] विश्वेषां देवानां कृते ते
श्राद्धप्रतिष्ठार्थमिदं हिरण्यम् अग्निदेवतं यथानाम गोत्राय
ब्राह्मणाय दक्षिणां दातुमहं संप्रददे एवं मातामहादि देवद
क्षिणां दद्यात् ततोऽपसव्येन मोटकतिलजलैः पित्रादिश्राद्ध
दक्षिणां दद्यात् ॐ अद्यामुकगोत्र पितरमुकशर्मणः कृते तत्पा
र्वणश्राद्धप्रतिष्ठार्थं रजतं चन्द्रदैवतं यथानाम गोत्राय ब्रा
ह्मणाय दक्षिणां दातुमहं संप्रददे एवमेव पितामहादि
[illegible]

ष्णोः संपूर्णं स्यादिति श्रुतिः यत्कृतं तत्कृतमस्तु यन्न कृतं तद्वि
ष्णोः प्रसादात् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु आयुः प्रजां
धनं विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छन्ति तथा राज्यं
पितरः श्राद्धतर्पिताः श्रीसूर्याय नमः इति पठित्वा कर्म
संपूर्णं विष्णुं स्मरेत् श्राद्धपात्रहस्तानि ब्राह्मणाय प्रति
पादयेत् पिण्डं अग्नौ अप्सु वा प्रक्षिपेत् ततो बलिवै[illegible]श्वदे
वकर्मशिष्टं कुर्यात् एवं पार्वणश्राद्धविधिः एवं च विधिः
उपनयनविवाहमहत्स्नाती पुत्रप्राप्तिनिमित्तकादिश्राद्धेषु बो
द्धव्यः पुत्रप्राप्तिनिमित्तकश्राद्धेऽपि वा हवनं वा इति विशे
षः इति श्राद्धविवेके पार्वणश्राद्धप्रयोगः समाप्तः शुभमस्तु संवत्